१०

स्वाध्यायान्मा प्रमदः

(छात्राः विद्यालयाद् बहिः भित्तौ लग्नं विशालं पत्रं पश्यन्ति)

वेदप्रकाशः – राजेश ! किमर्थमत्र भित्तिपत्रं संलग्नम् ?

राजेशः – विश्वविद्यालये समावर्तनोत्सवः भविष्यति, तदर्थम् एतत् विशालं रमणीयं भित्तिपत्रम्।

कात्यायनी – समावर्तनोत्सवे किं भविष्यति ?

सुजाता – अरे, न जानासि ? सभा भविष्यति, प्रमाणपत्रवितरणं च भविष्यति।

राजेशः – कश्चिद् विशिष्टः विद्वान् पदाधिकारी वा आगत्य दीक्षान्तभाषणं करिष्यति।

कात्यायनी – दीक्षान्तः नाम किम्?

वेदप्रकाशः – अहमपि न जानामि, अस्मिन् विषये अध्यापकमेव प्रक्ष्यामः।

(अध्यापकः पृष्ठतः छात्राणां वार्तालापं श्रुत्वा)

अध्यापकः – अयि छात्राः! चिन्ता मास्तु, सर्वं बोधयिष्यामि। प्राचीनकालीना शिक्षाव्यवस्था अतीव स्पृहणीया आसीत्। बालाः गुरुकुलेषु स्थित्वा गुरुभ्यः विद्याध्ययनं कुर्वन्ति स्म।

वेदप्रकाशः – महोदय! तत्र छात्राः किं किं पठन्ति स्म?

अध्यापकः – तत्र विशेषतः धर्म-दर्शन-विज्ञान-वेदवेदाङ्गानाम् अध्ययनम् अध्यापनं च भवतः स्म। विद्यार्थिनः प्रायेण तत्र द्वादशवर्षाणि यावत् पठन्ति स्म। अध्ययनसमाप्तौ गुरुकुलात् स्वगृहं गच्छन्ति स्म। शिक्षान्ते समावर्तनोत्सवः भवतः स्म। आचार्यः समावर्तनकाले अन्तेवासिभ्यः उपदिशति स्म। तादृशः उपदेशमूलकः सारस्वतकार्यक्रमः अधुनापि आचर्यते। स एव दीक्षान्तः।

छात्राः – आचार्य! तदानीं दीक्षान्ते किं किम् उपदिशति स्म?

अध्यापकः – अस्तु, अवहिताः शृणुत —



© NCERT not to be republished

कृष्णयजुर्वेदान्तर्गता काचिद् उपनिषद् वर्तते, *तैत्तिरीयोपनिषद्* इति। तत्र शिक्षावल्ली आनन्दवल्ली भृगुवल्लीति भागत्रयमस्ति। विशेषतः नैतिक-शैक्षिकोपदेशनिमित्तं शिक्षावल्ली प्रसिद्धा। तत्र शिष्यः स्वाधीतविद्यायाः जीवने सदुपयोगं कथं कुर्याद् इति सुष्ठु प्रकाशितम्। तदेव अनुसरणीयम् अस्माभिः। शृण्वन्तु ततः कानिचन उपदेशवाक्यानि।

"वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।"

सर्वं शब्देन भासते

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखत
अनूच्य (अनु+√वच्+ ल्यप्)	उक्त्वा	पढ़ाकर	having taught	
अनुशास्ति (अनु+√शास् +लट्-प्र. पु.ए.व.)	उपदिशति	उपदेश देता है	to instruct	
अन्तेवासिनम् (अन्ते+ √वस्+ णिनि पुं.द्वि.ए.व.)	शिष्यम्	शिष्य को	to the disciple (student)	

© NCERT not to be republished

वद (√वद्+ लोट् म.पु.ए.व.)	कथय	बोलो	speak	
चर (√चर्+लोटि म.पु.ए.व.)	आचरणं कुरु	आचरण करो	practice / conduct your self	
स्वाध्यायात् (पुं.प.ए.व.)	वेदस्य निर्दिष्टांशस्य अध्ययनात्	वेद के निर्दिष्ट भाग को पढ़ने से	by studing the prescribed section of the veda	
मा प्रमदः (प्र+√मद् + लुङ् + म.पु. ए.व.)	न विस्मरः	नहीं भूलना	to not forget	
न प्रमदितव्यम् (प्र+√मद्+तव्यत् नपुं. प्र.ए.व.)	प्रमादः न कर्तव्यः	नहीं भूलना चाहिए	should not be forgotten	
कुशलात् (नपुं.प्र.ए.व.)	आत्मरक्षामूलक-कार्यात्	आत्मरक्षा के लिए किए जाने वाले कर्म से	from actions performed for self protection	
भूत्यै (स्त्री.च.ए.व.)	ऐश्वर्यनिमित्तम्	ऐश्वर्य देने वाले शुभकार्यों के लिए	for auspicious deeds that bring prosperity	
प्रवचनम् (न.पुं.प्र.ए.व.)	प्रकृष्टं वचनम्	चर्चा	discussion	

© NCERT not to be republished

मातृदेवः (बहुव्रीहिः)	माता देवः यस्य सः	माता देवता है जिसके लिए	one who treats his mother as a deity	
पितृदेवः (बहुव्रीहिः)	पिता देवः यस्य सः	पिता को देवता समझने वाला	one who treats his father as a deity	
अतिथिदेवः (बहुव्रीहिः)	अतिथिः देवः यस्य सः	अतिथि को देवता समझने वाला	one who treats a guest as a deity	
आचार्यदेवः (बहुव्रीहिः)	आचार्यः देवः यस्य सः	आचार्य को देवता समझने वाला	one who treats his teacher as a deity	
अनवद्यानि (नञ् तत्पुरुषः)	न अवद्यानि	निन्दा रहित	without blame	
सेवितव्यानि (√सेव् +तव्यत् न.पु. प्र.ब.व)	पालनीयानि	आचरण करना चाहिए	should perform	
नो (अव्ययम्)	निषेधः	नहीं	not / no	
इतराणि (नपुं.प्र.बहु)	अन्यानि	इनसे विपरीत	opposite to these	

© NCERT not to be republished

सुचरितानि (कर्मधारय नपुं.पु.ब.व)	सुष्ठु शोभनानि चरितानि	शास्त्र के अनुकूल शुभ कर्म	auspicious deeds in accordance to the scriptures	
उपास्यानि (उप+√आस्+यत् नपुं. प्र.पु.ब.व)	उपासनायोग्यानि	उपासना करनी चाहिए	should worship	
श्रेयांसः (पुं प्र.ब.व)	श्रेष्ठाः	श्रेष्ठ	superior	
ब्राह्मणाः (पुं प्र.ब.व)	ब्रह्मविदः विद्वांसः	ब्रह्म को जानने वाले विद्वान	scholars who know brahman	
आसनेन (नपुं.तृ. एक).	आसनप्रदानेन	बैठने के लिए आसन देकर	by offering a seat to sit	
प्रश्वसितव्यम् (प्र+√श्वस्+तव्यत् नपुं. प्र.ए.व.)	सेवनीयम्	थकान दूर करनी चाहिए	should remove tiredness	
श्रद्धया (स्त्री.तृ.ए.व.)	सम्मानेन/आदरेण	आदर से	with respect	
देयम् (√दा+यत्)	दानयोग्यम्	देना चाहिए	should be given	
अश्रद्धया (स्त्री.तृ.ए.व. नञ् तत्पुरुषः)	न श्रद्धा, तया	अनादर भाव से	disrespectfully	

© NCERT not to be republished

अदेयम् (नञ् तत्पुरुषः)	न देयम्	देना नहीं	to not give	
श्रिया (स्त्री.तृ.ए.व.)	धनानुसारम्	धन के अनुसार	according to ones wealth	
भिया (स्त्री.तृ.ए.व.)	भयेन	भय(डर) मानते हुए	with fear	
ह्रिया (स्त्री.तृ.ए.व.)	लज्जया	लज्जापूर्वक	modestly	
संविदा (स्त्री.तृ.ए.व.)	ज्ञानेन	मैत्री भाव से	with a feeling of friendship	
आदेशः (आ+√दिश्+घञ्)	आज्ञा	आज्ञा	to give order	
उपदेशः (उप्+√दिश्+ घञ्)	परामर्शः	उपदेश	advice	
वेदोपनिषत् (षष्ठीतत्पुरुषः)	वेदस्य उपनिषत्	वेदों का रहस्य	the secret of the vedas	
उपनिषत् (उप+नि+√सद्+क्विप्)	गूढः उपदेशः	अध्यात्म विद्या	spiritual knowledge	
अनुशासनम् (अनु+√शास्+ल्युट् स्त्री.प्र.ए.व.)	आज्ञापालनम्	नियमानुकूल आचरण	disciplined conduct	
उपासितव्यम् (उप्+√आस्+तव्यत् नपुं. प्र.ए.व.)	उपासनायोग्यम्	उपासना करनी चाहिए	should worship	

© NCERT not to be republished

अभ्यासाद् जायते सिद्धिः

१. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —

(क) आचार्यः कम् अनुशास्ति ?

(ख) किं कृत्वा आचार्यः अन्तेवासिनम् अनुशास्ति ?

(ग) कानि सेवितव्यानि ?

(घ) के अस्मत् श्रेयांसः भवन्ति ?

(ङ) कथम् अदेयम् ?

२. समस्तपदानि पठितविषयात् निरूपयत —

(क) माता एव देवः यस्य सः .....

(ख) पिता एव देवः यस्य सः .....

(ग) न अवद्यानि .....

(घ) न श्रद्धा, तया .....

(ङ) सुष्ठु (शोभनानि) चरितानि .....

३. स्तम्भमेलनं कुरुत —

क स्तम्भः	**ख स्तम्भः**
(क) सुचरितानि	(१) देयम्
(ख) संविदा	(२) वेदोपनिषत्
(ग) एषा	(३) उपास्यानि
(घ) अनवद्यानि कर्माणि	(४) प्रश्वसितव्यम्
(ङ) आसनेन	(५) सेवितव्यानि

© NCERT not to be republished

४. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरत —

(क) तानि सेवितव्यानि .....

(ख) अश्रद्धयाऽदेयम् .....

(ग) धर्मात् न प्रमदितव्यम् .....

(घ) एतत् अनुशासनम् .....

(ङ) एष उपदेशः .....

५. अधस्तनानि पदानि व्यवहृत्य वाक्यानि रचयत —

(क) इतराणि .....

(ख) प्रमदितव्यम् .....

(ग) भिया .....

(घ) सुचरितानि .....

(ङ) त्वया .....

६. विषयानुसारं शुद्धम् उत्तरं चिनुत —

(क) कम् अनूच्य आचार्यः अन्तेवासिनमनुशास्ति?

(i) शास्त्रम् (ii) उपनिषदम् (iii) वेदम् (iv) मन्त्रम्

(ख) कस्मात् न प्रमदितव्यम्?

(i) असत्यात् (ii) अधर्मात् (iii) स्वाध्यायात् (iv) आलस्यात्

(ग) मातृदेवः इत्यस्य कोऽर्थः?

(i) मातृदेवी (ii) माता एव देवः यस्य सः

(iii) माता हि देवता (iv) मातृस्वरूपा देवः

(घ) कानि सेवितव्यानि?

(i) अनवद्यानि कर्माणि (ii) सुचरितानि

(iii) उपास्यानि (iv) इतराणि

(ङ) ह्रिया - इत्यस्य कोऽर्थः?

(i) भयेन (ii) लज्जया (iii) श्रद्धया (iv) मित्रभावेन

© NCERT not to be republished

स्वाध्यायान्मा प्रमदः

भारतीय-दर्शनस्य वैदिकसाहित्यस्य साररूपेण उपनिषद्वाङ्मयं प्रसिद्धम्, उपनिषद्वाङ्मयस्य समाजं विश्वं च प्रति महती उपादेयता विद्यते। व्यावहारिके जगति मानवजीवनस्य पूर्णताप्राप्तये आभिमुख्यं प्राधान्येन उपनिषद्वाङ्मये सन्निवेशितम्। *कृष्णयजुर्वेदान्तर्गता तैत्तिरीयोपनिषद्* विशेषतः शैक्षिकम् उपादानं प्रसारयति।

उप-सामीप्येन नि-नितरां निधाय अन्तर्धाय सीदन्ति प्राप्नुवन्ति परं ब्रह्म यया विद्यया सा उपनिषत्।

उपनिषत्समूहस्तु वेदान्तसार उच्यते।
गुरूपदेशमात्रेण शिष्यसंशयनाशकः॥

अध्यात्मब्रह्मविद्यायाः शङ्कानाशनकारणम्।
उपनिषद्रहस्यं तु सर्वे जानन्तु तत्त्वतः॥

भावार्थः

आचारनिपुणः गुरुः वेदं पाठयित्वा वेदस्य रहस्यं साररूपेण शिष्यं प्रति उपदिशति-यथार्थम् अवगतं सत्यं तथ्यं वक्तव्यम्। शास्त्रपरम्परानुसारं धर्मसम्मतं कर्म आचरणीयम्, प्रतिदिनं वेदशास्त्राणाम् अध्ययनात् विच्युतिः न भवेत्। सत्यनिष्ठायाः अवहेला न कार्या, धार्मिकाध्यात्मिकानुष्ठानात् विरतिः न भवेत्। आत्मरक्षामूलककार्यात् विच्युतिः न भवेत्। ऐश्वर्यलाभार्थकमङ्गलकार्येषु प्रमाद न भवेत्। जनः आत्मनः उन्नतये शुभकार्येषु मनोनिवेशं कुर्यात्। स्वयं वेदशास्त्राणाम् अध्ययनं कुर्यात् अन्यान् अपि वेदशास्त्रार्थान् बोधयेत्। लोकहितकरयज्ञ-परोपकार-वृक्षरोपणप्रभृतिदैविककार्यसमुदायात् पूर्वजानां पितृलोकानां च कृते श्राद्धतर्पणादिकार्यात् विच्युतः न भवेत्। (लोकानां कल्याणार्थं दैविकं कार्यं सम्पादयेत्, स्वजीवने पितृपुरुषाणां हितकरं वचनम् आदर्शं च पालयेत्।

माता, पिता, आचार्यः, आगन्तुकः सज्जनः च एव प्रत्यक्षं देवाः भवन्ति इति विचारयेत्। यानि अनिन्दितानि प्रशंसनीयानि कार्याणि सन्ति, तानि अवश्यं पालयेत्। अपराणि निन्दितानि कर्माणि वर्जयेत्, यानि अस्माकं गुरुजनानां शुभकार्याणि उत्तमानि आचरणानि सन्ति तानि अनुसरेत्, संशयजनकानि असदाचरणानि वर्जयेत्। ये केचन ब्रह्मदर्शिनः विद्वांसः सन्ति ते अवश्यम् अस्माकम् अपेक्षया श्रेष्ठाः भवन्ति, अतः तेषां दर्शनात् सान्निध्यलाभात् च आसनादिप्रदानपूर्वकं श्रम-क्लान्तिलाघवनिमित्तं यथाविधि सेवां कुर्यात्। दानमेव महत् पुण्यम् अतः यस्मै किञ्चित् दातव्यमस्ति श्रद्धया दद्यात्, कदापि अनादरभावेन न दातव्यम्। स्वशक्त्या धर्मार्जितधनानुसारं लज्जया विनयभावेन च दातव्यम्। उत्तमविचारेण मित्रभावेन धनं दद्यात्।

एषः अवश्यं पालनीयः विधिः। शिष्य सन्तति कृते एष आजीवनं हितकरः उपदेशसमूहः। एतत् सर्वं वेदस्य रहस्यम्। एतत् अनुशासनम् ईश्वरस्य आज्ञा। एवं प्रकारेण सर्वविधम् अनुष्ठानं करणीयम्।

© NCERT not to be republished

- वेदम्+अनूच्य+आचार्यः+अन्तेवासिनम्+अनुशास्ति=वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति
- स्वाध्यायात् + मा = स्वाध्यायान्मा, सत्यात् + न = सत्यान्न
- कुशलात् + न = कुशलान्न, यानि + अस्माकम् = यान्यस्माकम्
- त्वया + उपास्यानि = त्वयोपास्यनि, च + अस्मत् + श्रेयांसः + ब्राह्मणाः = चास्मच्छ्रेयांसो ब्राह्मणाः
- त्वया + आसनेन = त्वयाऽसनेन,
- एतत् + अनुशासनम् = एतदनुशासनम्

प्रसिद्धाः उपनिषदः

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।
ऐतरेयं छान्दोग्यञ्च बृहदारण्यकं दश॥

यस्तु क्रियावान् मनुजः स विद्वान्

(१) उपनिषदां नामानि लिखत। प्रसिद्धानाम् उपनिषदां संग्रहं कृत्वा पठत।

(२) कस्याश्चित् उपनिषदः श्रेष्ठं ध्येयं वाक्यं लिखित्वा गृहे स्थापयत।

(३) विविधानां प्रतिष्ठानानाम् औपनिषदिकसूक्तानि संगृह्य लिखत।

(४) एकस्याः उपनिषदः महत्त्वविषये एकम् अनुच्छेदं लिखत।

© NCERT not to be republished

विशिष्टाः सूक्तयः

क्र.सं.	सूक्तिः	हिन्दी अनुवाद	Meaning
1	क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे। (*भोजप्रबन्धः*-168)	कार्यसिद्धि सामर्थ्य से होती है, उपकरणों से नहीं।	Success comes from ability, not from tools.
2	आपदर्थे धनं रक्षेत्। (*महाभारतम्*, उद्योगपर्व-37.18)	विपत्ति के समय के लिए धन का संचय एवं संरक्षण करना चाहिए।	One should save wealth for times of adversity
3	उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। (*पंचतन्त्रम्*-2.141)	कार्य केवल इच्छा या कल्पना करने से नहीं, बल्कि परिश्रम और पुरुषार्थ से ही सिद्ध होते हैं।	Tasks are accomplished not just by desire or imagination, but through hard work and effort.
4	नास्ति विद्यासमं चक्षुः। (*महाभारतम्*, शान्तिपर्व-175.35)	विद्या के समान कोई नेत्र नहीं है।	There is no eye equal to knowledge.
5	सत्यमेव जयते नानृतम्। (*मुण्डकोपनिषद्*-3.1.6)	सत्य की ही विजय होती है, असत्य की नहीं।	Truth always wins, not falsehood.
6	न किञ्चिदपि तद्वस्तु यदभ्यासस्य दुष्करम्। (*बोधिचर्यावतारः*-6.14)	नियमित अभ्यास करने वाले के लिए कोई भी कार्य कठिन नहीं होता।	Nothing is too difficult for one who practices regularly.

© NCERT not to be republished

7	असंशयं हि कालस्य पर्यायो दुरतिक्रमः। (*महाभारतम्*, सौप्तिकपर्व-8.51)	निस्संदेह, समय की गति का अतिक्रमण करना असंभव है।	Indeed, the course of time is impossible to overcome.
8	सङ्गच्छध्वं, संवदध्वम्। (*ऋग्वेदः*-10.191.2)	साथ चलो, साथ बोलो।	Move together, speak together.
9	शरीरमाद्यं खलु धर्मसाधनम्। (*कुमारसम्भवम्*-5.33)	निःसन्देह शरीर ही धर्म के पालन का प्रथम और प्रमुख साधन है।	The body is indeed the primary means of performing righteous deeds.
10	शीलं परं भूषणम्। (*नीतिशतकम्*-83)	चरित्र ही सर्वश्रेष्ठ आभूषण है।	Character is the greatest ornament.
11	सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम्। (*किरातार्जुनीयम्*-2.3)	किसी भी कार्य को बिना सोचे-समझे नहीं करना चाहिए, क्योंकि बिना विचार के किया गया कार्य बड़ी-बड़ी विपत्तियों का कारण बनता है।	Never act impulsively. Thoughtless actions often lead to serious troubles and misfortunes.
12	यादृशं वपते बीजं तादृशं लभते फलम्। (*महाभारतम्*, अनुशासनिकपर्व)	जैसा बीज बोया जाता है, वैसा ही फल प्राप्त होता है।	As the seed one sows, so is the fruit one reaps.
13	साहसे श्रीः प्रतिवसति। (*मृच्छकटिकम्*-4 अङ्कः)	साहसी व्यक्ति को ही सफलता और समृद्धि प्राप्त होती है।	Courage attracts success.

© NCERT not to be republished

14	शुभेन कर्मम् सौख्यम्। (*महाभारतम्*, अनुशासनपर्व-6.18)	अच्छे कार्य करने से सुख और शांति मिलती है।	Good actions lead to happiness.
15	शनैर्विद्या शनैरर्थाः। (*बृहस्पतिनीतिसारः*)	विद्या धीरे-धीरे प्राप्त होती है और धन भी धीरे-धीरे अर्जित होता है।	Knowledge is acquired gradually, and wealth is accumulated gradually.
16	पण्डिताः समदर्शिनः। (*श्रीमद्भगवतगीता*-5.8)	विद्वान् सभी प्राणियों को समान दृष्टि से देखते हैं।	The wise men see all beings with equal vision.
17	रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय। (*मेघदूतम्*, पू.मे.-20)	खाली वस्तु हल्की होती है, जबकि पूर्णता ही गरिमा और सम्मान का कारण बनती है।	An empty thing is always light, whereas fullness gives it gravity and honour.
18	मौनं सर्वार्थसाधनम्। (*पञ्चतन्त्रम्*)	मौन सभी उद्देश्यों की सिद्धि का साधन है।	Silence is the means to accomplish all purposes.
19	उपायं चिन्तयेत् प्राज्ञस्तथापायं च चिन्तयेत्। (*पञ्चतन्त्रम्*)	बुद्धिमान व्यक्ति किसी कार्य के उपाय के साथ-साथ उससे होने वाली हानि पर भी विचार करता है।	A wise person should consider both the means to achieve a goal and the possible dangers or adverse consequences.
20	शठे शाठ्यं समाचरेत्। (*विदुरनीतिः*)	कपटी व्यक्ति के साथ उसके अनुरूप व्यवहार करना चाहिए।	Deal with a deceitful person in a manner appropriate to his deceit.

© NCERT not to be republished

21	कर्मण्येवाधिकारस्ते। (*श्रीमद्भगवतगीता*-2.47)	मनुष्य का अधिकार केवल अपने कर्तव्य का पालन करने में है, उसके फल पर नहीं।	You have the right only to action, not to its fruits.
22	परोपकारः पुण्याय पापाय परपीडनम्। (*पञ्चतन्त्रम्*-1.101)	परोपकार करना पुण्य का कारण है और दूसरों को कष्ट पहुँचाना पाप का कारण है।	Helping others leads to merit; causing suffering to others leads to sin
23	धर्मो रक्षति रक्षितः। (*मनुस्मृतिः*-8.10)	जो धर्म की रक्षा करता है, धर्म उसकी रक्षा करता है।	Dharma protects those who protect it.
24	दमो हि परमो लोके। (*महाभारतम्*, शान्तिपर्व-154.10)	आत्मसंयम संसार में सबसे श्रेष्ठ गुण है।	Self-control is the supreme excellence in human life.
25	विद्याधनं सर्वधनप्रधानम्। (*प्रसङ्गाभरणम्*)	विद्या का धन सभी धनों में सर्वोत्तम है।	The wealth of knowledge is the greatest of all forms of wealth.
26	वसुधैव कुटुम्बकम्। (*हितोपदेशः*-1.70)	सम्पूर्ण पृथ्वी ही एक परिवार है।	The whole world is one family.
27	दुर्जनः परिहर्तव्यः। (*नीतिशतकम्*-53)	दुर्जन का त्याग करना चाहिए।	A wicked person should be avoided.
28	दयामूलो भवेद्धर्मः। (*अग्निपुराणम्*-5.24)	दया ही धर्म का आधार है।	Compassion is the foundation of Dharma.

© NCERT not to be republished

29	सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः। (*तैत्तिरीयोपनिषद्*-1.11.1)	सत्य बोलो, धर्म का आचरण करो और स्वाध्याय में कभी प्रमाद (लापरवाही) मत करो।	Speak the truth, practise righteousness, and never neglect self-study.
30	बुद्धिर्यस्य बलं तस्य। (*पञ्चतन्त्रम्*-1.101)	जिसके पास बुद्धि है, वास्तविक बल उसी का है।	True strength belongs to the one who possesses wisdom.
31	तमसो मा ज्योतिर्गमय। (*बृहदारण्यकोपनिषद्*-1.3.28)	हे प्रभु! मुझे अज्ञानरूपी अन्धकार से ज्ञानरूपी प्रकाश की ओर ले चलिए।	Lead me from darkness to light.
32	दुर्लभं भारते जन्म। (*स्कन्दपुराणम्* मा. चौ.-12.54-55)	भारतभूमि में जन्म लेना महान सौभाग्य है।	To be born in the land of Bharata (India) is a great blessing.
33	सन्तोषतुल्यं धनमस्ति नान्यत्। (*पञ्चतन्त्रम्*- 2.155)	सन्तोष के समान दूसरा कोई धन नहीं है।	There is no wealth equal to contentment.
34	मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव। (*तैतिरीयोपनिषद्*-1.11.1-2)	माता को देवतुल्य मानो, पिता को देवतुल्य मानो, आचार्य को देवतुल्य मानो।	Treat your mother as divine, treat your father as divine, and treat your teacher as divine.
35	धैर्यधना हि साधवः। (*कादम्बरी*)	सज्जनों का वास्तविक धन धैर्य होता है।	Patience is the true wealth of the noble.

© NCERT not to be republished

36	सत्यं ब्रूयात् प्रियं ब्रूयात्। (*मनुस्मृतिः*-4.137)	सत्य बोलना चाहिए, प्रिय बोलना चाहिए।	One should speak the truth and speak pleasantly.
37	क्रोधो प्राणहरः शत्रुः। (*रामायणम्*, उ. का.)	क्रोध प्राणों का नाश करने वाला शत्रु है।	Anger is an enemy that destroys life.
38	लोभः पापस्य कारणम्। (*भोजप्रबन्धः*)	लोभ पाप का कारण है।	Greed is the cause of sin.
39	विद्या ददाति विनयम्। (*हितोपदेशः*)	विद्या से विनय प्राप्त होता है।	Knowledge gives rise to humility.
40	तिलमात्रमप्युपकारं शैलमात्रं मन्यते साधुः। (*चाणक्यसूत्राणि*-378)	सज्जन व्यक्ति तिल के समान छोटे से उपकार को भी पर्वत के समान महान मानता है।	A noble person regards even the smallest act of kindness as great as a mountain.
41	प्रारब्धमुत्तमजना न परित्यजन्ति। (*नीतिशतकम्*-27)	श्रेष्ठ पुरुष जिस कार्य का आरम्भ करते हैं, उसे बीच में नहीं छोड़ते।	Noble people never abandon a task once they have begun it.
42	श्रद्धया साध्यते सर्वम्। (*नारदपुराण*, पूर्वभाग-1.4.1)	श्रद्धा से सभी कार्य सिद्ध हो जाते हैं।	Everything can be accomplished through faith
43	उपायं चिन्तयेत्प्राज्ञो ह्यपायमपि चिन्तयेत्। (*पञ्चतन्त्रम्*)	बुद्धिमान व्यक्ति को उपाय (समाधान) के साथ-साथ उसके संभावित अपाय (हानि या दुष्परिणाम) पर भी विचार करना चाहिए।	A wise person should consider not only the solution but also its possible risks and consequences.

© NCERT not to be republished

44	फलं भाग्यानुसारतः। (*महाभारतम्*)	फल भाग्य के अनुसार प्राप्त होता है।	The result comes according to one's destiny.
45	समाना हृदयानि वः। (*ऋग्वेदः*-10.161.4)	तुम सबके हृदय एक समान भावना और सद्भाव से युक्त हों।	May your hearts be filled with the same spirit and harmony.
46	परोपकाराय सतां विभूतयः। (*नीतिशास्त्रम्*-66)	सज्जनों की सम्पत्ति परोपकार के लिए होती है।	The wealth of the noble is meant for the welfare of others.
47	अजरामवत्प्राज्ञो विद्यामर्थं च चिन्तयेत्। (*हितोपदेशः* प्रस्ताविका-3)	बुद्धिमान व्यक्ति को ऐसा समझकर विद्या और धन की प्राप्ति का प्रयास करना चाहिए मानो वह कभी वृद्ध या मृत नहीं होगा।	A wise person should strive to acquire knowledge and wealth as though he would never grow old or die.
48	कालो हि दुरति क्रमः। (*चाणक्यनीतिः*-16)	काल का अतिक्रमण करना असम्भव है।	Time is indeed impossible to overcome.
49	जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। (*चाणक्यनीतिः*)	जल की बूँद-बूँद गिरने से घड़ा धीरे-धीरे भर जाता है।	A pot is gradually filled by the falling of drops of water.
50	समानशीलव्यसनेषु सख्यम्। (*हितोपदेशः*)	समान स्वभाव और समान रुचि वाले लोगों के बीच ही सच्ची मित्रता होती है।	Friendship exists among those who share the same nature and interests.

© NCERT not to be republished

51	दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्। (*नीतिशतकम्*-53)	दुष्ट व्यक्ति, चाहे वह विद्या से सुशोभित (अत्यंत विद्वान) ही क्यों न हो, उसका भी त्याग करना चाहिए।	Even if a wicked person is highly learned and adorned with knowledge, they should still be avoided.
52	अद्यैव कुरु यच्छ्रेयः। (*महाभारतम्*)	जो कल्याणकारी (श्रेष्ठ) कार्य है, उसे आज ही करो।	Do today itself whatever is good and beneficial.
53	शक्तानां भूषणं क्षमा। (*महाभारतम्*, उद्योगपर्व-33.49)	श्रेष्ठ व्यक्तियों का आभूषण क्षमा है।	Forgiveness is the true ornament of virtuous people
54	प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः। (*चाणक्यनीतिः*-16.17)	मधुर वचन बोलने से सभी प्राणी प्रसन्न हो जाते हैं।	Everyone is pleased when spoken to with kind and pleasant words.
55	सर्वत्रार्जवं शोभते। (*मृच्छकटिकम्*-10.39)	हर स्थान पर सरलता और निष्कपटता शोभा देती है।	Honesty and sincerity are admired everywhere.
56	शौचे यत्नः सदा कार्यः। (*नारदपुराणम्*, पू.भा-प्र. पा- 27.8)	स्वच्छता बनाए रखने का सदैव प्रयास करना चाहिए।	One should always strive to maintain cleanliness.
57	श्रद्धावान् लभते ज्ञानम्। (*श्रीमद्भगवद्गीता*-4.39)	श्रद्धावान व्यक्ति ज्ञान प्राप्त करता है।	A faithful person gains knowledge
58	सुखस्य मूलं धर्मः। (*कौटिल्यार्थशास्त्रम्*)	सुख का मूल (आधार) धर्म है।	Righteousness is the root of happiness.

© NCERT not to be republished

59	युक्तियुक्तं प्रगृह्णीयाद् बालादपि विचक्षणः। (*शार्ङ्गधरपद्धतिः*-452)	बुद्धिमान व्यक्ति को युक्तिसंगत बात छोटे बालक से भी ग्रहण कर लेना चाहिए।	A wise person should accept a reasonable idea even from a child.
60	नास्ति कीर्तिसमं धनम्। (*बृहन्नारदीयपुराणम्*-21.32)	कीर्ति के समान कोई धन नहीं है।	There is no wealth equal to a good reputation.

© NCERT not to be republished



लौकिकन्यायाः

क्र.सं.	न्यायाः	Meaning
1	काकतालीयन्यायः	mere coincidence
2	कूपमण्डूकन्यायः	narrowmindedness (frog in the well)
3	अन्धगजन्यायः	partial knowledge leads to wrong conclusions (blind men and the elephant)
4	रज्जुसर्पन्यायः	mistaking illusion for reality
5	शुक्तिरजतन्यायः	mistaking appearance for reality (shell for silver)
6	स्थालीपुलाकन्यायः	a small sample represents the whole
7	गजस्नानन्यायः	futile effort; repeating the same mistake
8	मर्कटकिशोरन्यायः	selfeffort (monkey's baby clings to its mother)
9	मार्जालकिशोरन्यायः	dependence on grace (kitten carried by its mother)
10	क्षीरनीरन्यायः	right and seperation of right from wrong
11	हंसक्षीरन्यायः	ability to distinguish the essential from the nonessential
12	बकध्यानन्यायः	concentration on single object

© NCERT not to be republished

13	मात्स्यन्यायः	the strong eats the weak (law of the jungle)
14	काकदन्तगवेषणन्यायः	searching for the impossible
15	शशविषाणन्यायः	impossible thing (rabbit's horn)
16	वन्ध्यापुत्रन्यायः	a nonexistent entity (son of a barren woman)
17	मरुमरीचिकान्यायः	mirage; false hope
18	देहलीदीपन्यायः	one action benefiting two sides
19	सिंहावलोकनन्यायः	looking back to review or evaluate
20	दग्धबीजन्यायः	a burnt seed never sprouts; irreversible state
21	बीजाङ्कुरन्यायः	cause and effect
22	वटबीजन्यायः	great things arise from small beginnings
23	तैलधारान्यायः	continuous, uninterrupted concentration
24	पद्मपत्रजलन्यायः	remaining unattached despite living in the world

© NCERT not to be republished

न्यायानां प्रसङ्गानुगुणं प्रयोगाः

केषाञ्चन न्यायानां प्रसङ्गानुगुणं प्रयोगाः

कूपमण्डूकन्यायः

- कश्चन जनः स्वस्य भाषा एव उत्तमा इति मनुते। सः अन्यभाषाणां साहित्यं संस्कृतिं च न जानाति।
- कश्चन जनः स्वस्य कष्टानि परमकष्टानि इति चिन्तयति। यतः सः अन्येषां कष्टानि न दृष्टवान्।
- कश्चन छात्रः केवलं पाठ्यपुस्तकमेव पठति। अन्येषां ग्रन्थानां पठनं नावश्यकमिति चिन्तयति।

काकतालीयन्यायः

- कदाचित् विद्युत् न भवति। कश्चन गीतं गायति विद्युत् आगच्छति। तदा सः वदति मम गीतेन एव विद्युत् आगता इति।
- कश्चन मनसि कञ्चित् तर्जयति। तदा एव तस्य आघातः भवति। तर्हि सः चिन्तयति मम तर्जनेन एव आघातः जातः इति।

गजस्नानन्यायः

- शिक्षकः प्रतिदिनं स्वच्छतायाः महत्त्वं बोधयति। तथापि छात्रः कक्षायाम् अवकरं क्षिपति।
- पितरः आरोग्यरक्षणार्थं Junk food न खादतु इति वदन्ति तथापि केचन सर्वदा तदेव खादन्ति।
- कश्चन कर्मचारी समयपालनस्य प्रतिज्ञां करोति। परन्तु प्रतिदिनं विलम्बेन एव आगच्छति।

हंसक्षीरन्यायः

- सामाजिकमाध्यमेषु अनेकाः वार्ताः दृश्यन्ते। विवेकवान् छात्रः सत्यतां परीक्ष्य एव तान् स्वीकरोति।
- विपणिषु बहूनि फलानि भवन्ति। जनाः उत्तमानि फलानि परिशील्य स्वीकुर्वन्ति।

© NCERT not to be republished

- जनाः विविधान् परामर्शान् सूचयन्ति। बुद्धिमान् जनः आलोच्य हितकरं परामर्शमेव गृह्णाति।

सिंहावलोकनन्यायः

- परीक्षायाः अनन्तरं छात्रः परीक्षाकेन्द्रात् बहिः आगत्य प्रश्नपत्रं पुनः परिशीलयति।
- क्रीडाप्रतियोगितायाः समाप्तौ दलस्य प्रशिक्षकः सम्पूर्णं क्रीडाप्रदर्शनं विश्लेषयति।
- कश्चन छात्रः बहुधा प्रयत्नं करोति परं सफलः न भवति। तर्हि सः किं किं कृतवान् कुत्र दोषाः अभवन् इति सर्वमपि पुनः परिशीलयति।
- कश्चन लेखकः पुस्तकस्य मुद्रणात् पूर्वं सम्पूर्णं लेखं पुनः पठति।

रज्जुसर्पन्यायः

- कश्चन जनः रात्रौ स्वस्य छायां दृष्ट्वा भीतः भवति।
- बालः उद्याने दूरात् एकां नलिकां दृष्ट्वा सर्पः इति भीतः भवति। समीपं गत्वा ज्ञातवान् यत् सा केवलं जलनलिका इति।

बिन्दुबिन्दुनिपातन्यायः

- एकः छात्रः प्रतिदिनं केवलं पञ्च नूतनानि संस्कृतवाक्यानि जानाति। सः वर्षान्ते सम्यक् संस्कृतेन वक्तुं प्रभविष्यति।
- बालिका प्रतिसप्ताहं किञ्चत् धनं संगृह्णाति। वर्षानन्तरं सा पश्यति कदाचित् तद् धनं अत्यधिकं भवति।
- छात्रः एकस्मिन् विषये प्रतिदिनम् एकघण्टां पठति। सः कतिपयेषु मासेषु तस्मिन् विशिष्टं ज्ञानं प्राप्नोति।
- बालः प्रतिदिनं एकं वृक्षं रोपयति। वर्षान्ते तत् विशालम् उपवनं भवति।

क्षीरनीरन्यायः

- न्यायाधीशः उभयपक्षयोः प्रमाणानि सम्यक् परीक्ष्य एव निर्णयं करोति।
- विद्यार्थी अन्तर्जालात् प्राप्तासु सूचनासु सत्यासत्ययोः विवेकं कृत्वा एव परियोजनां लिखति।

© NCERT not to be republished